# दानस्य महिमा

(सामान्यस्वरसन्धिप्रयोगः)

पुरा कलिङ्गदेशे कश्चित् **नरेशः** आसीत् । सः नीतिमान् प्रजानुरञ्जकः **चासीत्** । अतः सर्वाः प्रजाः **तस्यादरं** कुर्वन्ति स्म । तस्मिन् राज्ये कश्चित् दुर्मतिः निवसति स्म । सः सर्वदा तस्य महीपालस्य कुत्सारटनं कृतवान् । **राजासीत् परोपकारी** । सः दुर्जनस्य स्वभावपरिवर्त्तनाय उपायम् अचिन्तयत् । एकदा **तस्याज्ञया** राजसेवकाः दुर्जनकुटीरे उपस्थिताः । ते दुर्जनाय कम्बलं, स्यूतपूर्णं पिष्टम्, फेनकपेटिकां, शर्करापूर्णं स्यूतं **चार्पितवन्तः ।** दुष्टात्मा एतत् सर्वं **दृष्ट्वातीव** गर्वितः । **महीशस्य** दानं तं प्रति सम्मानप्रदर्शनस्य निदर्शनम् **इत्यचिन्तयत्** । **गर्वान्धः** सः सहसा **ग्रामाधीशं निकषागच्छत्** सर्वम् उक्तवान् च । **ग्रामाधीशः तस्यात्मप्रशस्तिं** श्रुतवान् । सः मृदुहास्येनावदत्-मूर्ख ! त्वम् **अतीव** नीचः, महाराजस्य महानुभवतां न जानासि । सः **महीन्द्रः** तव दर्पाच्छादनार्थं कम्बलं **क्षुधोपशान्तये** पिष्टं, मलिनभावनायाः शुद्धये फेनकम्, मधुरवचनाय च शर्करां प्रेषयति । **ग्रामाध्यक्षस्य** वचनेन तस्य मस्तकम् अवनतम् । आत्मसंयमः, मधुरालापः, उदारभावना, दानम् - इति चतुष्टयं महापुरुषस्य भूषणमिति सः ज्ञातवान् ।

| |
|---|
| **नरेशः, नीतिमान्, आदरम्, दुर्मतिः, परोपकारी, भृत्याः, कम्बलम्, स्यूतम्, पिष्टम्, फेनकपेटिका, शर्करा, गर्वान्धः, मूर्खः, मस्तकम्, भूषणम् ।** |

## टिप्पणी

**शब्दार्थः -**

पुरा - पूर्वं (ପୂର୍ବେ), नरेशः - राजा (ରାଜା), दुर्मतिः - मन्दबुद्धिः (ଦୁଷ୍ଟବୁଦ୍ଧି), कुत्सारटनम् - गालिः (ଗାଳି), स्यूतं व्यागइतिभाषायाम् (ବ୍ୟାଗ), पिष्टम् - गोधूमचूर्णम् (ଅଟା), फेनकपेटिकाम् - फेनक (सावुन) पेटी (ସାବୁନ ପେଟୀକୁ), निकषा - समीपम् (ପାଖକୁ), मस्तकम् - शिरः (ମୁଣ୍ଡ) ।

# अभ्यास :

१. **उच्चैः पठत, लिखत ।**

**(क)** अ + अ = आ → ग्राम + अधीशः = ग्रामाधीशः

अ + अ = आ

अ + आ = आ → उच्च + आसनम् = उच्चासनम्

अ + आ = आ

आ + अ = आ → तथा + अस्तु = तथास्तु

आ + अ = आ

आ + आ = आ → सुधा + आकरः = सुधाकरः

आ + आ = आ

**(ख) तथैव लिखत -** मुनि + इन्द्रः = मुनीन्द्रः

☐ + इ = ई

मही + इन्द्रः = महीन्द्रः

☐ + ☐ = ई

परि + ईक्षा = परीक्षा

☐ + ई = ☐

मही + ईशः = महीशः

ई + ई = ☐

**(ग)** साधु + उक्तिः = साधूक्तिः

उ + उ = ☐

लघु + ऊर्मिः = लघूर्मिः

☐ + ऊ = ऊ

वधू + उक्तिः = वधूक्तिः

↓ ↓ ↓

□ + □ = ऊ

भू + ऊर्ध्वम् = भूर्ध्वम्

↓ ↓ ↓

□ + ऊ = □

(घ) शुभ + इच्छा = शुभेच्छा

↓ ↓ ↓

□ + इ = ए

नर + ईशः = नरेशः

↓ ↓ ↓

अ + ई = □

यथा + इष्टम् = यथेष्टम्

↓ ↓ ↓

□ + इ = ए

महा + ईश्वरः = महेश्वरः

↓ ↓ ↓

□ + ई = ए

(ङ) लम्ब + उदरः = लम्बोदरः

↓ ↓ ↓

अ + □ = ओ

एक + ऊनः = एकोनः

↓ ↓ ↓

अ + □ = □

गंगा + उदकम् = गंगोदकम्

↓ ↓ ↓

□ + उ = ओ

महा + ऊर्मिः = महोर्मिः

↓ ↓ ↓

आ + ऊ = □

(च) अति + अधिकम् = अत्यधिकम्

↓ ↓ ↓

[इ] + [ ] = [य्]

इति + आदि: = इत्यादि:

↓ ↓ ↓

[इ] + [आ] = [ ]

नदी + अम्बु = नद्यम्बु

↓ ↓ ↓

[ ] + [अ] = [ ]

देवी + आगमनम् = देव्यागमनम्

↓ ↓ ↓

[ ] + [ ] = [य्]

(छ) तथा + एव = तथैव

↓ ↓ ↓

[आ] + [ ] = [ऐ]

एक + एकम् = एकैकम्

↓ ↓ ↓

[ ] + [ए] = [ ]

महा + ऐश्वर्यम् = महैश्वर्यम्

↓ ↓ ↓

[ ] + [ऐ] = [ऐ]

**२. उदाहरणानुसारं शून्यस्थानं पूरयत ।**

(क) गुण + आकर: = गुणाकर: → अ + [आ]

(ख) राजा + [ ]सीत् = राजासीत् → [ ] + आ

(ग) पर + उपकार: = प[ ]पकार: → अ + [ ]

(घ) इति + अचिन्तयत् = इ[ ]चिन्तयत् → इ + [ ]

(ङ) अति + [ ]व = अतीव → [ ] + इ

(च) क्षुधा + [ ]पशान्तये = क्षुधोपशान्तये → [ ] + [उ]

(छ) म☐ + ☐न्द्रः = महेन्द्रः → ☐ + इ

(ज) निकषा + ☐गच्छत् = निक☐गच्छत् → ☐ + अ

(झ) मत + ऐक्यम् = म☐क्यम् → ☐ + ऐ

(ञ) पितृ + ☐लयः = पित्रालयः → ऋ + आ

(ट) सु + ☐क्तिः = ☐क्तिः → उ + ☐

(ठ) महा + ☐शः = म☐शः → आ + ई

**३. बन्धनीमध्यस्थयथार्थशब्दैः शून्यस्थानानि पूरयत ।**

(क) नर + ☐ = नरेशः । (इशः, ईशः, ईसः)

(ख) मही + ☐ = महीन्द्रः । (इन्द्रः, ईन्द्रः, इन्द)

(ग) ☐ + आज्ञया = तस्याज्ञया । (तस्या, तस्य, तस्याः)

(घ) ☐ + इन्द्रियः = जितेन्द्रियः । (जित, जिता, यित)

(ङ) महा + उत्सव = ☐ । (महात्सवः, महोत्सवः, महौत्सवः)

(च) ☐ + ऋषिः = महर्षिः । (मह, महा, महत्)

**४. एकेन पदेन उत्तरं लिखत ।**

(क) नरेशः कीदृशः आसीत् ?

(ख) कः महाराजस्य कुत्सारटनं कृतवान् ?

(ग) गर्वान्धः दुर्जनः कं निकषा अगच्छत् ?

(घ) राजा मधुरवचनाय किं प्रेषयति स्म ?

(ङ) ग्रामाध्यक्षस्य वचनेन दरिद्रस्य किम् अवनतम् ?

**५. बन्धनीमध्यस्थयथार्थशब्दैः शून्यस्थानानि पूरयत ।**

(क) सर्वाः ____________ तस्यादरं कुर्वन्ति स्म । (राजा, प्रजाः, जनाः)

(ख) सः दर्पाच्छादनार्थं ____________ प्रेषयति । (काम्बलं, कमलं, कम्बलम्)

(ग) राजासीत् ____________ । (परापकारी, परोपकारी, परउपकारी)

(घ) कश्चित् ____________ निवसति स्म । (दुर्मतिः, सुमतिः, दुर्मतः)

(ङ) आत्मसंयमः महापुरुषस्य ____________ । (दूषणम्, भूषणम्, दोषणम्)

६. **मातृभाषया अनुवादं कुरुत ।**

(क) सः नीतिमान् प्रजानुरञ्जकः चासीत् ।

(ख) तस्याज्ञया भृत्याः दुर्जनकुटीरे उपस्थिताः ।

(ग) महाराजस्य महानुभवतां न जानासि ।

(घ) ग्रामाध्यक्ष्यस्य वचनेन तस्य मस्तकम् अवनतम् ।

(ङ) सः सर्वदा महीपालस्य कुत्सारटनं कृतवान् ।

७. **शुद्धशब्दं रचयत ।**

(क) टि पे क न का फे

(ख) ण म् म्भा ष स

(ग) मा धी ग्रा शः

(घ) प्र कः ञ्ज नु जा र

(ङ) त्म आ य सं मः

८. **स्तम्भमेलनं कुरुत।**

| **'क' स्तम्भ** | **'ख' स्तम्भ** |
|---|---|
| नरेशः | पूर्वकाले |
| पुरा | धनी |
| धनिकः | धार्मिकः |
| पुण्यात्मा | मिष्टभाषणम् |
| मधुरालापः | राजा |

**९. संशोधनं कुरुत ।**

(क) कश्चित् दुर्मतिः निवसन्ति स्म ।

(ख) ग्रामाधिशः तस्यात्मप्रशस्तिं श्रुतवान् ।

(ग) राजासीत् परोपकारः ।

(घ) सः ग्रामाधीशस्य निकषा अगच्छत् ।

(ङ) राजा मधुरवचनाय फेनकं प्रेषयति ।

**१०. सन्धिविच्छेदं कुरुत ।**

(क) क्षुधोपशान्तये

(ख) अतीव

(ग) चार्पितवन्तः

(घ) परोपकारी

(ङ) नैव

**११. सन्धिं कुरुत ।**

(क) गङ्गा + उदकम्

(ख) इति + अचिन्तयत्

(ग) दृष्ट्वा + अतीव

(घ) च + एव

(ङ) वन + औषधिः

•